# ब्रह्मानन्दस्वामिना सङ्कलितः श्रीश्रीरामकृष्णोपदेशः

## ब्रह्मचारिणा शुभदीपेन अनूदितः

### विषयः - माया

१. मायायाः स्वभावः कथं जानासि किम्? यथा जले वारिपर्णी। किञ्चित् इतस्ततः क्रियते चेत् वारिपर्णी अपसरति। परन्तु किञ्चित् परम् एव अनायासेन पूर्वस्थानम् अधिकरोति। तथा यावत् विचारं वा साधुसङ्गं वा कुर्वन्तु, न किञ्चित् चिरं तिष्ठति। किञ्चित् क्षणात् परं विषयवासना आवृणोति।

२. सर्पस्य मुखे विषं वर्तते, सः यदा स्वं भोजनं करोति तदा तस्य आहारः विषदिग्धः न भवति, परन्तु अन्यं यदा दशति, तदा विषमयं भवति। एवं भगवतः माया अस्ति चेद् अपि, तं (भगवन्तं) मोहयितुं न पारयति। किन्तु भगवान् अन्यान् मायया मोहयति।

४. यं प्रेतः आविशति सः यदि ज्ञातुं प्रभवति यत् सः प्रेताविष्टः, तर्हि प्रेतः पलायते। मायाच्छन्नः जीवः यदि सकृत् ज्ञातुं शक्नोति यत् सः मायाच्छन्नः, तदा माया तस्मात् पलायते।

५. जीवात्म-परमात्मनोः मध्ये मायायाः किञ्चन आवरणं वर्तते। मायायाः आवरणं न अपसरति चेत् परस्परं साक्षात्कारः न स्यात्। यथा अग्रे रामः, मध्ये सीता, एवञ्च पृष्ठे लक्ष्मणः अस्ति। अत्र रामः परमात्मस्वरूपः, लक्षणश्च जीवात्मस्वरूपः, मध्ये जानकी सीता मायावरणरूपेण स्थिता। यावत् माता जानकी मध्ये तिष्ठति, तावत् लक्ष्मणः रामं द्रष्टुं न पारयति। जानकी किञ्चित् अपसृता भवति चेत् तदा लक्ष्मणः रामं द्रष्टुं शक्नोति।

६. माया द्विविधा– विद्यामाया, अविद्यामाया च। एतयोः विद्यामायायाः पुनः प्रकारद्वयम्– विवेकः वैराग्यश्चेति। इयं विद्यामायां समाश्रित्य जीवः भगवतः शरणं याति। एवम् अविद्यामाया षड्विधा– कामः, क्रोधः, लोभः, मोहः, मदः, मात्सर्यम्। अविद्यामाया 'अहं', 'मम' ज्ञानेन मनुष्यान् वध्नाति। परन्तु विद्यामायायाः प्रकाशे सति जीवस्य अविद्या समूलं नश्यते।

७. यावत् जलं पङ्किलं भवति, तावत् चन्द्रसूर्ययोः प्रतिबिम्बं तस्मिन् सम्यक् द्रष्टुं न शक्यते। एवम् एव माया अर्थात् 'अहं', 'मम' च इत्यादि ज्ञानं यावत् न अपसरति, तावत् आत्मसाक्षात्कारः सम्यक् न भवति।

८. सूर्यः पृथिव्यां प्रकाशं ददाति। परन्तु लघीयान् अपि मेघखण्डः पुरतः आगत्य आवृणोति चेत्, एवं सूर्यः दृष्टिगोचरः न भवति। तथा एव सर्वव्यापिनं सर्वसाक्षिस्वरूपं सच्चिदानन्दं वयं तुच्छायाः मायायाः आवरणवशात् साक्षात्कर्तुं न पारयामः।

९. वारिपर्णी-छन्न-तडागे निमज्ज्य यदि वारिपर्णी अपसार्यते, तत्क्षणम् एव पुनः वारिपर्णी पूर्ववद् भवति। परन्तु वारिपर्णीम् अपसार्य्य यदि वंशेन बन्धनं क्रीयते, तर्हि वंशम् उल्लङ्घ्य पुनः वारिपर्णी आगन्तुं न शक्नोति। तद्वत् मायाम् अपसार्य्य ज्ञानभक्तिरूपवेष्टनी दीयते चेत् माया तन्मध्ये आगन्तुं न प्रभवति। सच्चिदानन्दः एव प्रकाशितः भवति।

१०. दक्षिणेश्वरे देवालये द्वारस्थितसङ्गीतशालायां गृहे उपरितले कश्चन साधुः कियन्तं कालम् अतिष्ठत्। सः साधुः तस्मिन् प्रकोष्ठे केनापि सह वार्तालापम् अकुर्वन्, सदा ध्यानधारणापरायणः तिष्ठति स्म। एकदा अकस्मात् मेघेन परितः अन्धकाराच्छन्नः अभवत्। केभ्यश्चित् क्षणेभ्यः परं झञ्झावातः

आगत्य मेघम् अपासारयत्। साधु तद् दृष्ट्वा प्रकोष्ठात् वहिः आगत्य सङ्गीतशालायाः अलिन्दे स्थित्वा भीषणं हासं कुर्वन् अनृत्यत्। तं तथा दृष्ट्वा ठाकुरः अपृच्छत्, 'त्वया तु प्रकोष्ठस्य मध्ये एव तुष्णीं स्थीयते, अद्य पुनः आनन्द-नर्तनं कथम्।' तदा साधुः अवदत्, 'संसारस्य माया इयमेव। प्रथमक्षणे स्वच्छः आकाशः, परन्तु झटिति मेघः आगत्य अन्धकारं करोति। एवं किञ्चित् परं यथा आसीत् तथा एव भवति।'



[बेलुडमठे श्रीश्रीरामकृष्णपरमहंसदेवस्य चित्रम्]